**संस्कृत-वार्ता:**

**दिनाङ्क :- 26.06.2025** **सायम् :- 06:20**

**आदौ-मुख्यवार्ता:**

- भारतेन अद्य ऐतिह्यम् विरचितम् यत भारतीयवायुसेनादलस्य कैप्टन शुभांशु शुक्ला Axiom-4 चालकम् इत्येतं समेत्य SpaceX Dragon अन्तरिक्षयानं अन्तर्राष्ट्रीयअन्तरिक्षस्थानकेन (ISS) सह सफलतया भारतीय समयानुसारं सायं चतुर्वादने सम्मिलितम्।
- भारतेन चीनदेशस्य छिंगदाओ नगरे शङ्घाई सहयोग सङ्गठन इत्यस्य रक्षामन्त्रिणाम् उपवेशने संयुक्त-घोषणापत्रे हस्ताक्षरं कर्तुं निराकृतम्।
- साइबर-अपराधानां डिजिटल-निगडनानां च भ्रष्टाचारं विरुध्य राष्ट्रव्यापी-दमनस्य कृते, सीबीआई-विभागेन पञ्च-राज्यानां द्विचत्वारिंशत स्थानेषु ऑपरेशन-चक्र-5- इत्यस्य अन्तर्गतं अन्वेषणं कृतम्।
- एयर इण्डिया फ्लाइट् एआई-171 इत्यस्य ब्लैक बॉक्स डाटा संगृहीतम्, अहमदाबादनगरे सद्य एव दुर्घटनायाः कारणभूतघटनानां क्रमेण पुनर्निर्माणं भवेत्।
- नेत्रोत्सवस्य पवित्रावसरे श्री जगन्नाथस्य, भगवान् बलभद्रस्य, देवीसुभद्रायाः च नबजौबनदर्शनाय पुरीनगरे सहस्रं यावत् भक्ताः एकत्रिताः आसन्।

**अथवार्ता: विस्तारेण**

**एक्सिओम-स्थापना**

भारतेन अद्य ऐतिह्यम् विरचितम्। भारतीयवायुसेनादलस्य कैप्टन शुभांशु शुक्ला एक्सिओम-4 चालकम् इत्येतं समेत्य स्पेस-एक्स ड्रैगन अन्तरिक्षयानं अन्तर्राष्ट्रीयान्तरिक्षस्थानकेन- आईएसएस सह सफलतया भारतीय समयानुसारं सायं चतुर्वादने सम्मिलितम्। एतेन अभियानेन भारतं एक चत्वारिंशत् वर्षाणाम् अनन्तरं मानव-अन्तरिक्ष-उड्डयनं प्रति प्रत्यागच्छति, येन श्रीशुक्ला चतुराशीत्यधिक ऊनविंशतितमे वर्षे राकेश-शर्मा-इत्यस्य अनन्तरम् अन्तरिक्षे द्वितीयः भारतीयः अस्ति । आईएसएस-याने चतुर्दश दिवसीय-वैज्ञानिक-अभियाने लखनऊनगरस्य शुभांशुशुक्ला अमेरिकी-पोलैण्ड्-हङ्गरी-देशानां अन्य-त्रिभिः अन्तरिक्षयात्रिभिः सह मिलित्वा हार्मोनी-मॉड्यूल्-इत्यस्मिन् स्थापितः। अनेन अभियानेन वैश्विक-अन्तरिक्ष-प्रौद्योगिक्याः नवीनतायां भारतस्य वर्धमानं नेतृत्वं प्रकाशितम् । नासा-समर्थनेन श्रीशुक्ला इसरो तथा जैवप्रौद्योगिकीविभागेन संयुक्तरूपेण विकसितानां अग्रणीजीवनविज्ञानप्रयोगानाम् नेतृत्वं करिष्यति। चालकदलस्य अभिवादनं कुर्वन् केन्द्रीयविज्ञानप्रौद्योगिकीमन्त्री डॉ. जितेन्द्रसिंहः शुक्लायाः अन्तरिक्षे प्रवेशः राष्ट्रगौरवस्य क्षणः इति उक्तवान्।

**भारत-एससीओ**

भारतेन चीनदेशस्य छिंगदाओ नगरे शङ्घाई सहयोग सङ्गठन इत्यस्य रक्षामन्त्रिणाम् उपवेशने संयुक्त-घोषणापत्रे हस्ताक्षरं कर्तुं निराकृतम्। आधिकारिकसूत्रेण प्रतिपादितम् यत् भारतं संयुक्त प्रतिवेदनस्य भाषायाः विषये सन्तुष्टः नैव अस्ति। अस्मिन् प्रतिवेदने पारेसीम्नि क्षेत्रे आतङ्कवादीनां क्रियाकलापानाम् स्पष्टं उल्लेखं नास्ति । रक्षामन्त्रिणः राजनाथसिंहस्य संयुक्तघोषणापत्रे ससाहमत्यं विनैव सम्मेलनमिदं संयुक्त विज्ञप्तौ समाप्तम्। एससीओ चार्टर इत्यस्यानुसारं संगठन मतदानं विनैव साहमत्ये निर्णयं प्रतिपादयति।

रक्षामन्त्री एससीओ-देशान् अवैधमानकानां अङ्गीकर्तुं आग्रहं कृतवान्। सः अवदत् यत् केचन् देशाः पारे सीम्नि आतङ्कवादं नीतिनां साधनरूपेण उपयोगं कुर्वन्ति तथा च आतङ्कवादिभ्यः आश्रयं यच्छन्ति।

इतः पूर्वं रक्षामन्त्री राजनाथसिंहः आतङ्कवादं चरमपंथवादं विरुध्य एकीकृतवैश्विक कार्याचरणस्य आह्वानं कृतवान्। चीनदेशस्य छिंगदाओ नगरे शङ्घाईसहयोग सङ्गठनम् इत्यस्य रक्षामन्त्रिणां उपवेशने सः अवदत् यत् शान्तिः समृद्धिः च आतङ्कवादेन सह नैव आगन्तुं शक्नोति। असौ अवदत् यत् भारतेन पारेसीम्नि आतङ्कवादीनां संरचनां विध्वंसितुं सिन्दूराभियानेन आत्म रक्षणस्य अधिकारस्य उपयोगः कृतः। सः अवदत् यत् भारतेन प्रदर्शितं यत् आतङ्कवादस्य केन्द्रं सुरक्षितं नास्ति अपि च भारतं तानि स्थलानि आलक्ष्य भेदं अवश्यमेव करिष्यति।

शङ्घाई सहयोग सङ्गठनम् एकोत्तरैकशत तमे वर्षे स्थापितं एकः अन्तः-सर्वकारीय निकायः अस्ति । तत्र भारतं सप्तदशोत्तरैकशत तमे वर्षे पूर्णरूपेण सदस्यं सञ्जातम्।

**सीबीआई**

साइबर-अपराधानां डिजिटल-निगडनानां च भ्रष्टाचारं विरुध्य राष्ट्रव्यापी-दमनस्य कृते, सीबीआई इति केन्द्रीय-अन्वेषण-विभागेन पञ्च-राज्यानां द्विचत्वारिंशत स्थानेषु ऑपरेशन-चक्र-5- इत्यस्य अन्तर्गतं निरीक्षणं कृतम्। राजस्थान, दिल्ली, हरियाणा, उत्तराखण्ड, उत्तरप्रदेशे च अन्वेषणं सञ्जातम् ।

**एयर इण्डिया-डाटा:**

एयर इण्डिया फ्लाइट् एआई-171 इत्यस्य ब्लैक बॉक्स डाटा संगृहीतम्, अहमदाबादनगरे सद्य एव दुर्घटनायाः कारणभूतघटनानां क्रमेण पुनर्निर्माणं भवेत्। अग्रिम ब्लैक-बॉक्स इत्यस्मात् क्रैश-प्रोटेक्शन-मॉड्यूल् इत्येतं सुरक्षितरूपेण निष्कासितम्, तथा च मैमोरी-मॉड्यूल इत्येतं च सफलतया अभिगत्य तस्य परीक्षणं ह्यः एव दिल्ल्यां एएआईबी इति विमानदुर्घटना अन्वेषण अभिकरणेन प्रयोगशालायां संगृहीतम्। एकस्मिन् वक्तव्ये नागरिक-उड्डयन-मन्त्रालयेन उक्तं यत् दुर्घटनायाः कारणभूतघटनानां क्रमस्य पुनर्निर्माणार्थं तथा विमाननसुरक्षासंवर्धनार्थं भविष्ये दुर्घटनाः निवारणाय च काकपिट्-वाइस-रिकार्डर्-फ्लाइट-डेटा-रिकार्डर् इत्येतयोः विश्लेषणं प्रचलति। पृष्ठभागस्य ब्लैक-बॉक्स एएआईबी-दलेन मंगलवासरे स्वस्य दिल्ली-प्रयोगशालायाम् आनीतम्।

**छत्तीसगढ-माओवादी**

छत्तीसगढे सुरक्षाबलैः सह आक्रमणे द्वे माओवादी महिले मारिते। नारायणपुर जनपदस्य अबूझमाड़ क्षेत्रस्य वनेषु अयं सङ्घर्षः सञ्जातः। क्षेत्रे माओवादिनां उपस्थिति विषये सूचनां प्राप्य जिला-रिजर्व-रक्षकः विशेष आरक्षि दलयोः च संयुक्तदलम् सुरक्षाभियानस्य कृते प्रेषितमासीत्। श्वः सायंकालादेव सुरक्षाबलानां नक्सलवादिनां च मध्ये गोलिकावर्षणं प्रचलति।

## <u>निर्वाचन-बिहार</u>

निर्वाचन-आयोगस्य नवसदस्यानां दलम् आगामि विधानसभानिर्वाचनानां सज्जतायाः समीक्षायै बिहारं सम्प्राप्तम्। एतत् दलं गतसायं राजधानीम् पटनाम् अवाप्तम्। मुख्यनिर्वाचनाधिकारी विनोदसिंह-गुंजियालः मतदातासूचिकायाः विशेषगहनसमीक्षायै अन्यैः अधिकारिभिः सह उच्चस्तरीयोपवेशनं कृतवान्। अद्यतन सूचनार्थं सः जिलानिर्वाचनपदाधिकारिभिः विभागीय आयुक्तैः अन्यवरिष्ठाधिकारिभिश्च सह मिलितवान् । आयोगेन मतदातृणां सूचीनां सटीकतां सुनिश्चेतुं प्रतिगृहं गत्वा समीक्षार्थं घोषणा विहितम्।

## भगवान जगन्नाथ:

नेत्रोत्सवस्य पवित्रावसरे श्री जगन्नाथस्य, भगवान् बलभद्रस्य, देवीसुभद्रायाः च नबजौबनदर्शनाय पुरीनगरे सहस्रं यावत् भक्ताः एकत्रिताः आसन्। अस्मिन् विशिष्ट दर्शने पञ्चदश दिवसानां एकान्तवासस्य अनन्तरं देवतानां पुनरागमनं भवति । देवानां दर्शनाय भक्ताः प्रातःकालादेव सुदीर्घपङ्क्तौ स्थिताः आसन् । दर्शनं गहन आध्यात्मिकभावन् उद्दीपयितुं प्रसिद्धम् अस्ति। अद्य श्रीजगन्नाथमन्दिरस्य सिंहद्वारस्य समीपे भव्यरथाः आनयिष्यन्ते। श्वः प्रातः षड्वादने रथयात्रा संस्कारः आरभ्यते। पहाण्डी इति नाम्ना प्रसिद्धः शोभायात्रा देवान् तेषां रथं प्रति नेष्यन्ते। रथकर्षणं सायं प्रायः चतुर्वादने आरभ्यते इति अपेक्षा अस्ति। नवदिवसीयवासाय देवताः स्वमातुलमन्दिरं गुण्डिचामन्दिरं प्रति गमिष्यन्ति। अधिकारिणः लक्षशः भक्तानां सङ्घटनस्य अपेक्षां कुर्वन्ति।

**।। इति वार्ता: ।।**